# शिक्षा–निदेशालयः राष्ट्रिय–राजधानी–क्षेत्रम्, देहली–सर्वकारः

## मध्यावधिः–अभ्यासप्रश्नपत्रम्– 2025-26

## कक्षा-– षष्ठी संस्कृतम्

**समयः 2.5 hr.** **पूर्णाङ्कः 60**

**सामान्य-निर्देशाः**

सर्वे प्रश्नाः अनिवार्याः।

उत्तराणि संस्कृतेनैव लेखनीयानि।

प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

प्रश्नसंख्या अवश्यमेव लेखनीया।

प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| • खण्ड 'क' | अपठित-अवबोधनम् | 8 अंकाः |
| • खण्ड 'ख' | रचनात्मक–कार्यम् | 12 अंकाः |
| • खण्ड 'ग' | अनुप्रयुक्त-व्याकरणम् | 18 अंकाः |
| • खण्ड 'घ' | पठित-अवबोधनम् | 22 अंकाः |

### खण्ड-क

**अपठित-अवबोधनम्** **8 अंकाः**

**प्र०1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तानां प्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

वयं प्रतिदिनं विद्यालयं गच्छामः। विद्यालयस्य भवनं विशालम् अस्ति। विद्यालयं परितः वृक्षाः सन्ति। विद्यालये एकः पुस्तकालयः अस्ति। पुस्तकालये विविधानि पुस्तकानि सन्ति। विद्यालये चत्वारिंशत् कक्षाः सन्ति। कक्षायां छात्राः पठन्ति। शिक्षकाः छात्रान् पाठयन्ति।

**अ) एकपदेन उत्तरत - (केवलं प्रश्नत्रयम्)** **3×1=3**

(क) वयं प्रतिदिनं कुत्र गच्छामः?

(ख) कस्य भवनं विशालम् अस्ति?

(ग) विद्यालयं परितः के सन्ति?

(घ) शिक्षकाः कान् पाठयन्ति?

**आ) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्)** **1x2=2**

(क) विविधानि पुस्तकानि कुत्र सन्ति?

(ख) विद्यालये कति कक्षाः सन्ति?

**स) यथानिर्देशम् उत्तरत- (केवल प्रश्नद्वयम्)** **2×1=2**

(क) 'पुस्तकानि' अस्य पदस्य एकवचनरूपम् अस्ति -

(अ) पुस्तकम्  (ब) पुस्तकानाम्  (स) पुस्तकान्  (द) पुस्तकैः

(ख) 'पठन्ति' इति पदं कस्मिन् लकारे अस्ति?

(अ) लृट्  (ब) लट्  (स) लोट्  (द) लङ्

(ग) 'विद्यालयं परितः वृक्षाः सन्ति' अत्र किं क्रियापदम् अस्ति?

(अ) 'विद्यालयं  (ब) परितः  (स) वृक्षाः  (द) सन्ति

**(द) अस्य अनुच्छेदस्य कृते उपयुक्त शीर्षक संस्कृतेन लिखत।** **1**

**खण्ड-ख**

**रचनात्मक कार्यम्  12 अंकाः**

**प्र०2. अधःप्रदत्तानि चित्राणि दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया चत्वारि वाक्यानि रचयत - (4x2=8)**









**मञ्जूषा**

| |
|---|
| कृषकः, चिकित्सिका, क्षेत्रं, सैनिकः, चटकाः, तिष्ठन्ति, रक्षति, कर्षति, पश्यति, सन्ति अस्ति |

अथवा

**मञ्जूषातः पदं चित्वा वाक्यानि पूरयत -**

**मञ्जूषा**

| गर्जतः, नृत्यन्ति, वृक्षाः, पिकः |
| --- |

१. ………………………….. फलन्ति।
२. सिंहौ …………………………..।
३. मयूराः…………………………..।
४. ………………………….. कूजति।

**प्र० 3. उचितेन सर्वनामपदेन संयोज्य वाक्यानि रचयत (4x1=4)**

| **क–स्तम्भः** | **ख–स्तम्भः** |
| --- | --- |
| (क) ते | (i) पठति |
| (ख) तौ | (ii) चलतः |
| (ग) सा | (iii) गच्छन्ति |
| (घ) ताः | (iv) धावन्ति |

**खण्ड-ग**

**अनुप्रयुक्त-व्याकरणम् 18 अंकाः**

**प्र.4 अधोलिखितानाम् उदाहरणानाम् अनुसारं रिक्तस्थानानि पूरयत– 3x1=3**

| | | |
| --- | --- | --- |
| क) आरक्षिका | ………(i)…………. | ………(ii )…………. |
| ………(iii)…………. | गायिके | गायिकाः |

**प्र. 5 अधोलिखितानाम् उदाहरणानाम् अनुसारं रिक्तस्थानानि पूरयत– 3x1=3**

| | | |
| --- | --- | --- |
| अस्ति | ………(i)…………. | सन्ति |
| ………(ii) …………. | ………(iii)…………. | स्मः |

**प्र.6 सा, ते, तत्, ताः** इत्येभ्यः शब्देभ्यः उचितं सर्वनामपदं चित्वा रिक्तस्थानानि पूरयत - **4x1=4**

**संज्ञाशब्दाः** **सर्वनामशब्दाः**

यथा- **लता** अस्ति                सा अस्ति।

(1) पिपीलिकाः चलन्ति।            …………………. चलन्ति।

(ii) चटके कूजतः।                 …………………. कूजतः।

(iii) सुधा वदति।                 ………………….  वदति।

(i) फलं पतति                   ………………….  पतति।

**प्र. 7 अङ्कानां कृते मञ्जूषातः चित्वा उचितं पदं पूरयत–                    4x1=4**

(i) जन्मोत्सवे (४२) ……………………… अतिथयः आगतवन्तः।

(ii) प्रतियोगितायां (१८) ………………….. छात्राः भागं गृहीतवन्तः।

(iii) बसयाने (३६)…………………. जनाः आसन्।

(iv) उद्याने (८४) …………………. वृक्षाः सन्ति।

**प्र.8 उदाहरणानुगुणं समयम् अक्षरैः संख्याभिर्वा लिखत –                    4x1=4**

| | | |
|---|---|---|
| ०७ ०० ……………………… | **अथवा** | पञ्चवादनम् |
| ०८ ४५ ……………………… | | सार्ध–सप्तवादनम् |
| ०६ ३० ……………………… | | पादोन–एकादशवादनम् |
| ०९ १५ ……………………… | | सपाद–दशवादनम् |

**खण्ड-घ**

**पठित-अवबोधनम्                    22 अंका:**

**प्र.9 अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत-                    5**

नमो नमः । मम नाम सन्दीपः । अहं मम दिनचर्या वदामि।

नमो नमः । मम नाम खुशी। अहम् अपि मम दिनचर्यां वदामि। अहं प्रतिदिनं प्रातः पञ्चवादने उत्तिष्ठामि । प्रथमं भूमेः वन्दनं करोमि, मातापितरौ च नमामि । ततः उषःपानं करोमि, यत्र कवोष्णं जलं पिबामि । अहं सपाद-पञ्चवादने शौचं करोमि, तदनन्तरम् मुखप्रक्षालनं दन्तधावनं च करोमि। अहं सार्ध-पञ्चवादने सूर्य-नमस्कारं योगासनं च करोमि। अहं षड्वादने स्वाध्यायं करोमि ।

**अ) एकपदेन उत्तरत– (केवलं प्रश्नमेकम्)                    1x1 = 1**

i. खुशी प्रतिदिनं प्रातः कति वादने उत्तिष्ठति ?
ii. स्वीयां दिनचर्यां कः वदति?

**ब)पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्)** **1x2 = 2**

i. खुशी कं नमति?
ii. सा कीदृशं जलं पिबति?

**स) यथानिर्देशम् उत्तरत- (केवलं प्रश्नद्वयम्)** **2x1 = 2**

i) **'कवोष्णं जलम्'** अनयोः पदयोः किं विशेष्यपदम् अस्ति?

क) कवोष्णम् ख) जलम् ग) उभे पदे घ) न किमपि

**ii)** **'प्रातःकालीनं जलं'** पदयोः कृते किं पर्यायपदं गद्यांशे प्रयुक्तम्?

क) उष:पानं ख) कवोष्णम् ग) प्रातः घ) मध्याह्नम्

**iii) 'अहं षड्वादने स्वाध्यायं करोमि'** अत्र अहम् इति सर्वनामपदं कस्मै प्रयुक्तम्?

क) सन्दीपाय ख) मानवाय ग) खुश्यै घ) छात्राय

**प्र.10 अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत-** **5**

शूरा वयं धीरा वयं वीरा वयं सुतराम् ।
गुणशालिनो बलशालिनो जयगामिनो नितराम् ॥
दृढमानसा गतलालसाः प्रियसाहसाः सततम् ।
जनसेवका अतिभावुकाः शुभचिन्तका नियतम् ॥

**अ) एकपदेन उत्तरत– (केवलं प्रश्नमेकम्)** **1x1 = 1**

i. शूराः के?
ii. वयं कीदृशमानसाः स्मः?

**ब) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्)** **1x2 = 2**

i. अतिभावुकाः के स्मः ?
ii. के नियतं शुभचिन्तकाः?

**स) यथानिर्देशम् उत्तरत- (केवलं प्रश्नद्वयम्)** **2x1 = 2**

i. ‘जनसेवकाः’ अत्र का विभक्तिः अस्ति?

क) प्रथमा  ख) पञ्चमी  ग) षष्ठी  घ) द्वितीया

ii. ‘कृतनिश्चयाः’ अस्य किं पर्यायपदं पद्ये प्रयुक्तम्?

क) दृढमानसा  ख) प्रियसाहसाः  ग) जनसेवकाः  घ) अतिभावुकाः

iii. ‘अशुभचिन्तकाः’ पदस्य किं विलोमपदं पद्यांशे प्रयुक्तम्?

क) अतिभावुकाः  ख) बलशालिनः  ग) शुभचिन्तकाः  घ) जयगामिनः

**प्र.11 अधोलिखितं संवादं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत– 5**

मनीषः– … शुकस्य चञ्चुः अपि रक्तवर्णा। पाटलपुष्पम् अपि रक्तवर्णेन युक्तम्।

शिक्षकः – शोभनम्। चित्रवर्णाः शुकाः अपि अत्र सन्ति इति जानन्ति किम्?

आदित्यः - आचार्य ! ते कीदृशाः भवन्ति ? वयं द्रष्टुम् इच्छामः।

शिक्षकः- तादृशान् शुकान् वयं प्रायः जन्तुशालायां पश्यामः। तेषां पक्षाः नीलाः पीताः रक्ताः च भवन्ति।

मञ्जुलः- आचार्य ! पाटलपुष्पाणि अपि विविधवर्णयुक्तानि भवन्ति। मम उद्याने पीतवर्णानि, श्वेतवर्णानि, नीललोहितवर्णानि, केसरवर्णानि च पाटलपुष्पाणि सन्ति।

शिक्षकः - उत्तमम्। पश्यन्तु, हंसः श्वेतः। तथा अन्ये के श्वेतवर्णाः ?

मेधा- आचार्य ! बकः शशः च। तथा भवतः प्रावारकम् अपि श्वेतम्?

शिक्षकः – आम्। सम्यक्। सर्वे स्वस्य अन्येषां च वस्त्राणां वर्णान् अवलोकयन्तु।

**अ) एकपदेन उत्तरत– (केवलं प्रश्नमेकम्) 1x1 = 1**

i. ) शुकस्य चञ्चुः कीदृशी अस्ति?

ii.) रक्तवर्णेन युक्तम् अन्यत् किम् अस्ति?

**ब) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) 1x2 = 2**

i.) चित्रवर्णान् शुकान् वयं कुत्र पश्यामः?

ii.) भवतः उद्याने कीदृशानि पाटलपुष्पाणि सन्ति?

**स) यथानिर्देशम् उत्तरत- (केवलं प्रश्नद्वयम्) 2x1 = 2**

i.) 'हंसः श्वेतः' अस्ति? अत्र हंसः इत्यत्र का विभक्ति?

क) द्वितीया ख) प्रथमा ग) सप्तमी घ) पञ्चमी

ii.) 'केसरवर्णानि पाटलपुष्पाणि' अनयोः पदयोः किं विशेषणपदम् अस्ति?

क) केसरः ख) केसरवर्णानि ग)पाटलानि घ) पाटलपुष्पाणि

iii.) 'धवलः' पदस्य किं पर्यायपदम् गद्यांशे प्रयुक्तम् अस्ति?

क) सितः ख) श्वेतः ग) शुभ्रः घ) शुक्लः

**12. मञ्जूषातः समुचितानि पदानि चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयत– 3x1= 3**

**12.** वर्णसंयोजनेन रिक्तस्थानानि पूरयत (केवलं प्रश्नत्रयम्)

**(i)** क्+र्+ई+ड्+अ+न्+अ+क्+आ+न्+इ= .......................................................

**(ii)** ध्+अ+र्+म्+अः= .......................................................

**(iii)** व्+इ+द्+य्+आ+ल्+अ+य्+अः= .......................................................

**अथवा**


वर्णविच्छेदं कुरुत -


**(i)** वचनम् .......................................................

**(ii)** पुस्तकम् .......................................................

**(iii)** युष्माकम् .......................................................

**13 चित्रं दृष्ट्वा वर्णानां नामानि लिखत। 4x1=4**



................................... ....................................... ..................................... .......................................